तस्थौ। तस्थिव। तस्थिम। इत्यादि। पा पाने। पपौ। पपतुः। पपुः। इत्यादि। ष्णा शौचे। पू

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

ध्वस्मस्मादि शेषः। सस्तौ। सस्ततुः। सस्तुः। सस्तिथ। सस्ता। स्था। ष्टुञ् स्तुतौ। तुष्टाव। तुष्टुवतुः।
तुष्टुवुः। तुष्टोथ। यजादित्वान्नेट्। यज देवपूजासंगतिकरणदानेषु। अकारः स्वरितेत उभयपदा
र्थः। यजाणि प्रतिस्थिते। द्विर्वचनादि। णवादौ पूर्वस्य। णवादौ परे यजादीनां ग्रहादीनां च पूर्वस्य सं
प्रसारणं भवति। यकारस्य इकारः। स इयाज। इजना ईनम्। यजां यवराणां छन्तः संप्रसारणं किति। यज
वचस्वपवहव्येअव्हेञवपवदवसां यकार वकार रेफाणां छन्त इकार उकार ऋकारा भवन्ति किति परे।
नेच संप्रसारणसंज्ञका भवन्ति सस्वास्यसस्वर संप्रसारणम्। दीर्घस्यादी र्घः संप्रसारणम्। ईजतुः। ईजुः। ईजि
थ। इयष्ठ। ईजथुः। ईज। इयाज। इयज। ईजिव। ईजिम। आत्मनेपदि। ईजे। ईजाते। ईजिरे। ई
जिषे। ईजाथे। ईजिध्वे। वचपरिभाषणे। उवाच। ऊचतुः। ऊचुः। उवचिथ। उवक्थ। ऊचथुः। ऊच।

ईजे। ईजिवहे। ईजिमहे। ७२

उवाच। उवच। ऊचिव। ऊचिम। ब्रूञ् व्यक्तायां वाचि। ब्रूञो वचिः। ब्रूञः परोक्षे। आत्मनेपदे वच इत्यादेशो
भवति। ऊचे। ऊचाते। ऊचिरे। इत्यादि। ञिष्वप् शये। सुष्वाप। सुषुपतुः। सुषुपुः। सुषुपिथ। सुष्वप्थ।
इत्यादि। सुष्वापसुषुविस। ना। नुगशां। अशादीनां पूर्वस्य नुगागमो भवति। तावादोमनि। अशू व्याप्तौ। ऊ
कार आत्मनेपदार्थः। आभ्वोर्णादावित्यान्त्वं विपूर्वः। व्यानशे विश्वं भगवान्। व्यानशाते। व्यानशिरे।।।
अंजू व्यक्तिम्रक्षणकांतिगतिषु। आनंज। आन्जितीति कि ङोलेनका चित। आनंजतुः। आनंजुः। आनंजि
थ। आनंक्थ। आनंजथुः। आनंज। आनंज। आनंजिव। आनंजिम। आनंजे। आनंजाते। आनंजिरे।
अर्च पूजायाम्। आनर्च। आनर्चतुः। आनर्चुः। चिनोतेः सन्लिटोर्वा किं त्वं वक्तव्यम्। चिञ् चयने इत्यस्य
धातोः सन्प्रत्यये लिटि च परे किं इत्ययमादेशो भवति। निर्पूर्वः। निश्चिकाय चिंराङा। निश्चिक्यतुः।

सा ६६

निश्चिक्युः। निश्चिक्यिथ। निश्चिकेथ। निश्चिक्यथुः। निश्चिक्य। निश्चिकय। निश्चिकाय। निश्चिक्यि
व। निश्चिक्यिम। चिचाय। चिच्यतुः। चिच्युः। इत्यादि। ग्रहिज्येति संप्रसारणम्। जग्राह। ज
गृहतुः। जगृहुः। जग्रहिथ। जग्रह। जगृहथुः। जगृह। जग्राह। जग्रह। जगृहिव। जगृहि
म। वेञ् तन्तुसन्ताने। वेञो वय् णलि। वेञो धातोरनपि विषयेवय् आदेशो भवति। लिट्यवेति द्वित्वम्।
पूर्वस्य हलादि शेषः। इति यकारलोपः। णावा लोपूर्वस्येति संप्रसारणम्। द्वितीयस्य ङ्गां यवराणात राम ६६
मित्यादि। उवाय। ऊयतुः। ऊयुः। ऊयिथ। व्यध ताडने। विव्याध। विविधतुः। विविधुः। विविधिथ। वि
व्यद्ध। विविधथुः। विविध। इत्यादि। प्रच्छ ज्ञीप्सायाम्। पप्रच्छ। पप्रच्छतुः। पप्रच्छुः। पप्रच्छिथ। पप्रष्ठ।
पप्रच्छथुः। पप्रच्छ। पप्रच्छ। पप्रच्छिव। पप्रच्छिम। प्रच्छादेः संयोगान्तात्किन्न। किन्त्वाभावेन संप्र
व्येञ संवरणे। संविव्याय। स्वाङ्गानं सूत्रः। संविव्यतुः। संविव्युः। संविव्यिथ। संविव्येथ। ५।

रामः

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

स्तात्तम्। हृदपोनःपुन्ययोर्लोट् मध्यमपुरुषैकवचनान्तनानिपात्यते। पुरीमवस्कन्दस्तुनीहिनन्द
नंमुषाणरालानिहरा मराङ्गनाः। विगरहा चक्रेनमुचिद्विषावलीय इत्यमस्वास्थ्य आशिषि।
यात् यास्ताम् यासुस् यास् यास्तम् यास्त यासम् यास्व यास्म सीष्ट सीयास्ताम् सीरन् सीष्ठास्
सीयास्ताम् सीध्वम् सीय सीवहि सीमहि धातोराशिषियादादयोभवन्ति भूयात् भूयास्ताम् भूया
सुः भूयाः भूयास्तम् भूयास्त भूयासम् भूयास्व भूयास्म सन्त्रीमान्भूयात् जीवशाल्यधारोत्ते
शतंशरदोजीव्यात्भवान् दादेरे दादेराकारस्यएकारादेशोभवतियादादौपरे देयात् धेयात् येयात्
इत्यादि यादादौ यादादौपरे ऋकारस्यरिङादेशोभवति क्रियात् क्रियास्ताम् क्रियासुः कृशाम
कृत्वः क्रियासुः कृषीष्ट कृषीयास्ताम् कृषीरन् कृषीष्ठाः कृषीयास्ताम् कृषीढ्वम् कृषी

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सा

६७

य॰ कृषीवहि कृषीमहि विसृक्षुत्तेमंगलंकृषीष्ट उः अकारस्य तिस्योरनिटोर्गुणो न भवति चेषी
ष्ट स्तोषीष्ट श्वोभाविन्यर्थे ता तारौ तारस् तासि तास्थः तास्थ तास्मि तास्वः तास्मः ता तारौ ता
रस तासे तासाथे ताध्वे ताहे तास्वहे तास्महे श्वोभाविन्यर्थे धातोस्तादयो भवन्ति सिसतासीस्यपाणि
ह धातोः परे षां सिसतासीस्यप्रत्ययानामिडागमो भवति भविता भवितारौ भवितारः भवितासि भवि
तास्थः भवितास्थ भवितास्मि भवितास्वः भवितास्मः श्वोभविताराऽग्यभारः कुमारस्य नैकस्वराद
नुस्वारात् एकस्वराद्धातोर्धातुपाठे अनुदात्त इत्येवं पठितात् इडागमो न भवति पक्ता पक्ता[रौ] प
क्तारः पक्तासे पक्तासाथे पक्ताध्वे पक्ताहे पक्तास्वहे पक्तास्महे एवं दाता पाता धाता भेत्ता हंता
होता नेता कर्त्ता इत्यादि स्यादौ भविष्यति स्यप धातोः स्यप्रत्ययो भवति भविष्यकाले तिवादिष्वष्टादश

ताध

राम

६७

स्यपरेषु। भविष्यति। भविष्यतः। भविष्यन्ति। भविष्यसि। भविष्यथः। भविष्यथ। भविष्यामि। भविष्यावः।
भविष्यामः। यजुस्स्यप् इति स्थिते। छ्रशषराजादिना षत्वम्। षढोः कः सि। धातोः षकारढकारयोः कत्वम्भवति
सकारे परे। यक्ष्यते। सौत्रा ज्ञा। यक्ष्येते। यक्ष्यन्ते। यक्ष्यसे। यक्ष्येथे। यक्ष्यध्वे। यक्ष्ये। यक्ष्यावहे। यक्ष्यामहे। हन्‌ग
मः स्यपः। हन्तेर् ऋकारान्ताद्गमेश्च परे स्यप इडागमो भवति। हनिष्यति। हनिष्यतः। हनिष्यन्ति। हरिष्यति। हरिष्य
तः। हरिष्यन्ति। गमिष्यति। गमिष्यतः। गमिष्यन्ति। सस्तो न वि। सकारस्य तकारो भवति सकारे परे अनपि विष
ये। वस निवासे। वत्स्यति। दह भस्मीकरणे। दादेर्घः। आदिजबानामित्यादिना धकारः। खसे चपा झसानामित्यादि
ना कत्वं षत्वञ्च [illegible]। धक्ष्यति। धक्ष्यते। दुह प्रपूरणे। धोक्ष्यति। उपधाया लघोः। धातोरुपधाया लघोर्ना
मिनो गुणो भवति। भेत्स्यति। छिदिर् द्वैधीकरणे। छेत्स्यति। तुद व्यथने। तोत्स्यति। एधिष्यते। शाधिष्यते। हास्यति।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सा ६८ हास्यते। दास्यति। दास्यते। धास्यति। धास्यते। स्तोष्यति। स्तोष्यते। भुज पालनाभ्यवहारयोः। भोक्ष्यते। इत्यादि। च्ले
द्। स्यप् क्रियातिक्रमे। क्रियाया अतिक्रमे कुत्रचिद् निष्पत्तौ सत्यां दिवादि परतः स्यप् प्रत्ययो भवति। यदि सु
वृष्टिः सुराज्यं चाभविष्यत्तदा सुभिक्षमभविष्यत्। अभोक्ष्यद्वान्यथा सिष्यत्। आस उपवेशने। अपस्यद्वा
न्यथाग्निः प्राज्वलिष्यत्। ज्वल दीप्तौ। शकॢ शक्तौ। अहनिष्यद्वान्यथा शक्ष्यत्। इत्यादि। भूते सिः। धातोर्भूते
मात्रे सिप्रत्ययो भवति दिवादि परतः। इकारः सेरिति विशेषणार्थः। दिवादावट्। अभू सादि विति स्थिते। दादेः
प३ वा। पैरस्मैपदे परे दाधास्थापाभूपिबतिभ्यः परस्य सेर्लोपो भवति। अभू दिः। अभूताम्। भुवः सिच्लोपे स्वरे राम
वुग्वक्तव्यः। अभूवन्। अभूतम्। अभूत। अभूवम्। अभूव। अभूम। डुदाञ् दाने। अदात्। अदाताम्। स्याविदः। ६८
सेराकारान्ताद्द्विरुक्तो न्तरस्यान उस् भवति। उस्यालोपो वक्तव्यः। अदुः। अदाः। अदातम्। अदात। अदाम्॥

मा२ माट:१

अदाव। अदाम। अधात्। अस्थात्। इणः सिलोपे गा वक्तव्यः। अगात् इत्यादि। माशब्दे प्रयुज्यमाने अटो लो
पो भवति। ब्र ट्वे ह्वायाम। ष्टिष्ट। अरे मागाः साध्वसं मागा गर्वितमन्दिरम्। स्मयोगेपीच्छन्ति। एवं स्मभूत्। वर्त्तमा
नार्थेत या अविभक्तेः स्मयोगे भूतार्थता वक्तव्या। आह स्म हारीतः। यजति स्म युधिष्ठिरः। लिङे। उपसर्गे पदे परे
सिसिद्धि वति त्तिवा वृद्धिः। अकार्षीत् इति स्थिते। सेः। सिशब्दात्परयोः दिस्योः ईडागमो भवति। आविरकार्षी
त्। आविरकार्ष्टाम्। आविरकार्षुः। आविरकार्षीः। आविरकार्ष्टम्। आविरकार्ष्ट। आविरकार्षम्। आविरका
र्ष्व। आविरकार्ष्म। आविरकार्षीत् स्नातं योगी। पर्यहार्षीत्। निराकार्षीत्। वदव्यक्तायां वाचि। भूते सिः।
द्विवाहवत्। अत उपधाया वृद्धिः। सिसतासीस्यपामिट्। अवादि स इति स्थिते। सेरीडागमः। अवादि स ई इति
स्थिते। इट ईटि। इट उत्तरस्य सेर्लोपो भवति। ईटि परे। सवर्णो दीर्घः सह। अवादीत्। प्राव्राजीत्। ह्म्यन्त क्षणश्वस

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सा
६९

जागृहसादिवर्ज्जं वृद्धिः। हकारान्तान्मकारान्तान्यकारान्तात्क्षणश्वसजागृहस आदिश
ब्दान्तश्विएभ्यः परस्य सेर्वृद्धिर्न भवति। ग्रह उपादाने। अग्रहीत्। असहीत्। वम उद्गिरणे। अवमी
त्। अय प्राप्तौ। आयीत्। क्षण हिंसायाम्। अक्षणीत्। श्वस। अश्वसीत्। अजागरीत्। हस हसने।
अहसीत्। ह्रस्वाज्झसे। ह्रस्वादुत्तरस्य सेर्लोपो भवति झसे परे। अकृत। अकृषाताम्। अकृष
त। अकृथाः। अकृषाथाम्। अकृढ्वम्। अकृषि। अकृष्वहि। अकृष्महि। तथा मिसा वात्मनेपदे
षु क्तव्यः। मकारोऽनुस्वारान्ताद्देशार्थः। अदित। अदिषाताम्। अदिषत। इङो वा गीसौ।
इङ् अध्ययने। इङो गी स्यादेशो भवति सौ परे। अध्यगीष्ट। अध्यगीषाताम्। अध्यगीषत। स्वरादेस्ति। १२
द्वितीयोऽडागमो भवति। अध्यैष्ट। अध्यैषाताम्। अध्यैषत। तुङ शब्दे। सिप्रत्ययादिकं पूर्ववद्वृद्धिः।

राम
६९

५२

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

इडागमईडागमश्च। आरावि स् ई त् इति स्थिते। इट् ईटि। दीर्घत्वम्। आरावीत्। आराविष्टाम्। आरा
विषुः। आरावीः। आराविष्टम्। आराविष्ट। आराविषम्। आराविष्व। आराविष्म। क्रसात्। क्रसादुत्तरस्य
सेर्लोपो भवति क्रसे परे। अपक्रः। अपन्हाताम्। अपन्हत। अपक्थाः। अपन्हाथाम्। अपकुध्वम्। अपन्हि।
अपन्ह्वहि। अपन्हमहि। अपान्हीत्। अपाक्राम्। अपान्हुः। अपान्हीः। अपाक्रम्। अपाक्र। अपान्हम्।
अपान्ह्व। अपान्हम। यङ्लुकि प्रायाम्। अप्रान्हीत्। अप्राह्णाम्। अप्रान्हुः। क्रसादिति किं। ऐधिष्ट। ऐधिषाताम्।
ऐधिषत। [illegible] अशायिष्ट। इरितो वा। इरितो धातोर्वा ङ प्रत्ययो भवति दिवादिपाः। अनुधत्। अ
नुधताम्। अनुधन्। इत्यादि। अनिटो नामिवतः। नामिवतोऽनिटो धातोः परस्मैपदे सिप्रत्यये भवति। परे वृद्धिः। २
अरौत्सीत्। अरौद्धाम्। अरौत्सुः। अरौत्सीः। अरौद्धम्। अरौद्ध। अरौत्सम्। अरौत्स्व। अरौत्स्म। अछिदत्।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सा॰ अस्यैत्सीत्। अमैत्सीत्। अदेवीत्। असेवीत्। षिवु सेवायाम्। णो क्रमनित्यम्। अदर्शत्। ॥हो भसेद
७० शाम्। दृशादीनां भ सेपरे अरोगम भवति· अद्राक्षीत्· अद्राष्टाम्· अद्राक्षुः· दृशिर प्रेक्षणे ।· स्पृश संस्पर्शने· अस्प्राक्षीत्· स्पृश संस्पर्शने·
स्पर्शने· अस्प्राक्षीत्· मृ ऊबस्पुछो· पराम्रीत्· मृश आमर्शने· सिस्योः। उपधाया गुणोन भवति
सिस्योरनिटो परतः। अभित्त। अभित्साताम्। अभित्सत। अवर्त्तिष्ट। वृतु वर्त्तने। लिपुषादेर्ङः। ल्टकार
न४ रइ परस्मैपदे सो लित् लिपो धातोः पुषादेश्च ङः प्रत्ययो भवति दिवादि परः। अगमत्। अस्पत्। अदृपत्।
अघुतत्। गम्लृ स्लृ गतौ। अपुषत्। ङे वचेनुमागमो वक्तव्यः। अवोचत्। अवोचाताम्। अवोचन्। अवो
चः। अवोचतम्। अवोचत। अवोचम्। अवोचाव। अवोचाम। हश्वान्तानां सके। हकारान्ताच्छकारान्ता राम
न्सकारान्तान्नाम्युपधाद्विद्यमाने दिवादि परः सकप्रत्ययो भवति। अधुक्षत्। अधुक्षेताम्। अधुक्षन्। ७०

न्प१

सेरववाहः४

अलिन्दृतन्। अलि[illegible]न्दृतताम्। अलिन्दृतन्। लिह आस्वादने। विश प्रवेशने। छशाषराजादिना षत्वम्। ष
ढोः कः सि। प्राविन्दृतन्। प्राविन्दृतताम्। प्राविन्दृतन्। ष्ठिव विरेवने। अष्ठेन्दृतन्। अष्ठेन्दृतताम्। अष्ठेन्दृतन्॥
अथ भावकर्मणोरेता विभक्तयो निरूप्यन्ते। तत्रादौ विकर्मणीति नियमात् आत्मनेपदानि प्रयुज्यन्ते। सु
९४ त्वमनुभू[illegible]वे देवदत्तेन। अनुबभूवाते। अनुबभूविरे। अनुबभूविषे। अनुबभूवाथे। अनुबभूविढ्वे॥
अनुबभूवे। अनुबभूविवहे। अनुबभूविमहे। पेचे। नेते। मनज्ञाने। मेने। ददे। सस्तेहं सविज्ञासया॥
रेहर्बन्हये। जग्ले। मम्ले। स्वरान्तानां हनग्रहदृशां भावकर्मणोः सिस्यतासीष्वपात्तिदिद्वा वक्तव्यः।
आशिषि सीष्टादयः। ति त्वा हृढिः। सुत्वमनुभाविषीष्ट भवता। अनुभाविषीयास्ताम्। अनुभावि
षीरन्। अनुभाविषीष्ठाः। अनुभाविषीयास्थाम्। अनुभाविषीढ्वम्। अनुभाविषीय। अनुभाविषी

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

मा ८२

वहि। अनुभाविषीमहि। णिज्भावे। अनुभविषीष्ट। [अनु] शायिषीष्ट। शायिषीष्ट। कारिषीष्ट।
कृषीष्ट इत्यादि। स्वस्तने। अनुभाविता। अनुभविता। स्यापि। अनुभाविष्यते। अनुभविष्यते। सुवंदे
वदत्तेन। क्रियातिक्रमेस्यापि। अन्वभाविष्यत। अन्वभविष्यतन्वयात न्वयंय अोष्यत। दूनैनत्यक त्तरि।
धातोस्तनिपरे कन्ठ वर्जिते ऽर्थेभावेकर्मणि च इण् प्रत्ययो भवति सेरपवादः। णकारो ऽनुबन्धः।
लोपः। इण्सन्नियोगे च तनो लोपो भवति। अन्वभाविभवो भवता। द्विवचनादौ वाणादि पूर्ववत्।
अन्वभाविषातान्। अन्वभाविषत। अन्वभाविष्ठाः। अन्वभाविषाथाम्। ध्वेचसेर्लोपः। अन्वभाविढ्वं। राम
अन्वभावि षि। अन्वभाविष्वहि। अन्वभाविष्महि। पन्हे द्विवचनादौ। अन्वभविषातान्।।।।।।। ८२
अन्वभविषत। अकारि। अकारिषातान्। अकारिषत। अकृषातान्। अकृषत। निरादःपूर्वः।।।

निराकारि। अहारि। अपाचि। अभोजि। धृञ् धारणे। निरधारि। निरधारिषाताम्। निरधृषाता मित्यादि। पदगतौ।
प्रतिपूर्वः। प्रत्यपादि। प्रत्यपत्साताम्। प्रत्यपत्सत। अमाति। सेटश्च सेर्ति त्वं व क्रोव्यम्। ततोऽन्त उपधाया वृद्धिः॥
अग्राहि। अग्राहिषाताम्। अग्राहिषत। अदर्शि इत्यादि। णीञ् प्रापणे। निरपूर्वः। निरणायि। आतोयुक्। आ
कारान्तस्य धातोर्युगागमो भवति ञिणति परे। अदायि। अस्नायि। निपूर्वः। न्यधायि। न्यधायिषाताम्। न्यधायिष
त। पदादेः कर्तर्यपी एवं क्रव्यः। उदपादि। बुध अवगमने। अबोधि। अजनि। जनिवध्योर्न वृद्धिः॥ इदानीं प्रत्य
यान्तेभ्यस्त्विवादयो योत्पन्ते॥ अतिशये हसादेर्यङ् द्विश्च। हसादेर्धातोरतिशयेऽर्थे यङ् प्रत्ययो भवति। तस्मि
न्सति धातोर्द्विर्वचनम्। यङि। यङि परे पूर्वस्य नामिनो गुणो भवति। बोभूय इति स्थिते। स धातुः। यङन्तादि प्र
यान्तः शब्दो धातुसंज्ञो भवति। धातुत्वात्तिबादयः। ङकारानुबन्धादात्मनेपदम्। अपकर्त्तरि। अरे इत्य

अबधि ४

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सा· ७२

कारलोपः। अतिशयेनपुनःपुनर्भवतीतिबोभूयते·बोभूयेते·बोभूयन्ते·बोभूयसे·बोभूयेथे·बोभूयध्वे·बोभूये·
बोभूयावहे·बोभूयामहे· बोमुज्यते·मुहवैचित्ये·मोमुह्यते·लेलिह्यते·जोहूयते·वेविद्यते· आतः·यङि स
तिपूर्वस्याकारस्य आकारोभवति·पापच्यते·पापठ्यते·स्वतादावदादीनांयङ्वक्तव्यः· स्वरादेःपरः· स्वरादे
र्धातोःपरोद्वितीयोऽवयवोद्विरुक्तःसस्वरोद्विर्भवति· अटाट्यते ऋ·ऋः· अशभोजने· अशाश्यते· आरार्य्यते·
अगतौ· भमजपांनुक्· भमान्तस्यजपादीनांचपूर्वस्यनुगागमोभवतियङिसति· जंगम्यते नुरङः· चमुचल
ने· चंचम्यते· हन्तेर्हिंसायांघ्नीवावक्तव्यः· जंघन्यते· जेघ्नीयते· जपजल्पव्यक्तायांवाचि· जपमानसोच्चारे· जंज
प्यते· जंजल्प्यते· दन्दह्यते· जभमैथुने· जंजभ्यते· दन्दश्यते· दंशदशने· द्वित्वंपूर्वस्यनुक्· दन्दशायदुतिस्थिते·
नोलोपः· धातोरुपधाभूतस्यनकारस्यलोपोभवतिक्ङितिहलिपरे· दन्दश्यते· मशाकेः· भंजूआमर्दने· ॥॥॥

राम ७२

ध्वंस्

वंभज्यते मन्त्रोऽन्त्रीतनू नित्यादि· रीगृदुपधस्य· ऋदुपधस्य धातोर्यङि सति पूर्वस्य रीगागमो भवति· नृतीगात्र
विक्षेपे· नरीनृत्यते नटः· धृग्नुवर्त्तते· वरीवृत्यते वार्त्तासु चित्रम्· पद्स्रंस्ध्वंस्भ्रंश्कस्पतस्कन्दां यङि पूर्वस्य
नीगागमो वक्तव्यः· उपपनीपद्यते· सनीस्रस्यते· दनीध्वस्यते· बनीभ्रश्यते· चनीकश्यते· चनीस्कन्द्यते· आ
हशिना मादेशो निर्दिश्यते इत्यादि· अतो रिः· अकारान्तस्य रिरादेशो भवति परे सति· पश्चाद्द्विर्वचनम्· क्रिक्रि
यते इति स्थिते· पूर्ववदुसादि शेषः· चुत्वं गुणः· येदीर्घः· अतिशयेन करोति चेक्रीयते· जेह्रीयते· हस्वर
ता· वेव्रीयते· स्मृङ् प्राणत्यागे मेम्रीयते· दादे रितीकारे द्विर्वचनम्· देदीयते· पेपीयते· तेष्ठीयते· माङ् माने·
माङ् शब्दे· मेङ् प्रतिदाने· दादेरितीकारे कृते· मेमीयते· इत्येवं रूपम्· वान्यत्र लुगनुवर्त्तते· अन्यत्रेत्युक्तेऽन्य
यसंयोगं विनापि वा यङो लुग्भवति· अनपि च हसात्· हसादुत्तरस्य यङो लुग्भवति· अनपि विषये· लुकि स

यङि ४

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

तिपिति स्मिवेकारोवक्तव्यः। हेः स्वरे पिति लोपधाया गुणः। छिस ऋस्य धातोः पिति स्वरे परे उपधाया ल
सा. बोरिति प्राप्नोति। बोभुजीति इत्यादि। यङः लुगन्तं परस्मैपदं कादिवद्द्रष्टव्यम्। पापचीति। पापक्ति। पाप
७३ क्तः। पापचति। पापचीषि। पापक्षि। पापक्थः। पापक्थ। पापचीमि। पापच्मि। पापच्वः। पापच्मः। वदव्यक्ता
यां वचि। अतिशयेन वदति। वावदीति। बट वेष्टायाम्। संजाबटीति। संजाबट्टि। संजाबट्टः। संजाबटति।
संबोभवीति। संबोभोति। संबोभूतः। संबोभुवति। नानप्योर्व उव्। संबोभवीषि। संबोभोषि। इत्यादि। ऋका
रान्तानामृदुपधानां च यङ्लुकि पूर्वस्य रुक् रिक् रीगागमो वक्तव्यः। चर्करीति। चरिकरीति। चरीकरीति। राम
चर्कर्ति। चरिकर्ति। चरीकर्ति। चर्कृतः। चरिकृतः। चरीकृतः। चर्क्रति। चरि क्रति। चरीक्रति। ७३
वृतु वर्तने। नृती गात्रविक्षेपे। नर्नर्ति। नरिनर्ति। नरीनर्ति। इत्यादि। कर्तुर्यङ्। कर्तुरुपमानादाचारेऽर्थे

यङ्प्रत्ययो भवति · श्येन इवाचरति श्येनायते काकः · पण्डितायते मूर्खः · यङि सलोपो वक्तव्यः · अप्सराय
ते कुरूपा · ओजायते · पयसस्तु विभाषया · पयायते पयस्यते वा · तत्र · आचार उपमानात् · उपमानादाचा
रेऽर्थे यः प्रत्ययो भवति · अकारस्य चा पि ईकारो भवति · पुत्रीयति शिष्यमुपाध्यायः · प्रासादीयति कुट्यां भि
क्षुः · इच्छायामात्मनः सः · धातोरिच्छायामर्थे सप्रत्ययो भवति सा चेत्स्वसंबन्धिनी इच्छा · भवितुमिच्छति बु
भूषति · वुः से · उश्च ऊश्च वु तस्मात् ग्रहगुहोश्च से परे इडागमो न भवति · नानिटि से · इ उ उर्जिते सप्रत्यये
परे गुणो न भवति · से दीर्घः · से परे दीर्घो भवति · चिचीषति · जिगीषति · युअमि अणो विमि अणो · युयूषति ·
जुहूषति · तुतूषति · ए ओ अश्च इश्च एकारः · अकारस्य पूर्व इकारो भवति से परे · गुणः प्रकृत्यर्थोऽन्यत्र
सति · काश्वन विपत्सति · पिपासति · त्वञहानो · तितन्सति · विवन्सति · जिघृन्सति · हन्तेः सोऽतिट् ·

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सा ७५

जिघांसति · अनतइन · अवर्णस्य इन् भवति इङ्किति परे · असार्वत्रिकोयं विधिः · घ्वो विहसे इनि दीर्घः · चिकीर्षति ·
जिहीर्षति · न ह्नवनतालोः · तितीर्षति · पतः · पकारस्य पूर्वकारस्य च लोपो भवत्यनपि विषये · चिकीर्ष्य
ते देवदत्तेन · पापचिता · इस्से · दरिद्रात्नां स्वरस्य से परे इस् आदेशो भवति पूर्वस्य च लोपः · स्स्तोनपीति सकारस्य
तकारः · दित्सति · धित्सति · प्रमित्सति · दुलमवजाप्नौ · लभे च पाभसानामिति मकारस्य पकारः · स्को र
घोश्चेति सकारलोपः · लिप्सते · रभ राभ स्या रिप्सते · पित्सति · पिपतिषति · पतो वेट् · पतो धातोः से परे वा इट्
भवति · आप्नोतेरी · आप्नोते धातोः स्वरस्य से परे ई भवति · पूर्वस्य च लोपः · ईप्सति · अशेर्नायो वा · अश्ना
ते धातोरिच्छायां वा अनायो भवति · अशनायति · अशिशिषति · गुध्यः · गुपादिभ्यः स्वार्थे सप्रत्ययो भवति ॥
हि स्व · गुप कुत्सने · जुगुप्सते · कित रोगापनयने संशये च · चिकित्सते · विचिकित्सति · तिजन्नमायाम् ॥॥

राम ७५

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

शीशांसते२

तितिक्षते।मानविचारणे।मानादीनांपूर्वस्यसेदीर्घोवक्तव्यः।मीमांसते।वधनिंदायाम्।आदिर्जवाना
मितिभकारः।बीभत्सते।दान्शान्तेजने।दीदांसते।आयः।गुपादिभ्यआयप्रत्ययोभवतिस्वार्थे।गु
पूरक्षणे।गोपायति।धूपायति। पणव्यवहारेस्तुतौपनच।पणायते।पनायते।नाम्नोयईचास्य।नाम्न
इच्छायामर्थेयप्रत्ययोभवतितत्सन्नियोगेचाकारस्येकारोभवति।आत्मनःपुत्रमिच्छतिपुत्रीयति।धनी
यति।काम्यमपीच्छन्ति।पुत्रंकाम्यति।करणेचयः।कंडूंकरोति।कंडूयति।णिङ्करणे।नाम्नोणिप्रत्य
त्ययोभवतिकरणेऽर्थे।सचङित्।अतउपधायाःवृद्धौप्राप्तायाम्।मितांह्रस्वः।धातुपाठेमितउत्येवंपठिता
नांह्रस्वोभवति।अपकर्तरि।गुणायादेशो।वटंकरोतिवटयति।महान्तंकरोतिमहयति।ऊढिंकरोति·

नमस्यति।तपस्यति।३

सा·
७५

ऊढयति। दंडं करोति दंडयति। पृथ्वादेः। प्रथयति। ऊढयति। धातोः प्रेरणे। धातोः प्रेरणे प्रयोजकव्यापा
रे णिः प्रत्ययो भवति। कुर्वंतं कारयति यः स प्रयोजकः। पाचयति। शासु अनुशिष्टौ। अनुशासयति। ह
न्तेर्घत्। हन्तेर्घत् आदेशो भवति णौ परे। घातयति। शदेः शत्। शातयति। रातौ णौ पुक्। अगतावित्यस्य धातोरा
कारान्तस्य च णौ परे पुगागमो भवति। दापयति। स्थापयति। यापयति। अर्प्य यति। स्मिजिक्ष्णुग्लामीञा
वक्तव्यः। । इङादेशे णौ पुग्वक्तव्यः। इङ् अध्ययने। अध्यापयति। पुगन्तस्य गुणः। ह्रीलज्जायाम्·
गुणश्च पुगागमः। ह्रेपयति। लीङ् विलयने। लीङः। लीङ आकारो भवति। विलापयति। भी स्मिङ् एत
योः हेतुभये आत्वम्। पुगागमः। विस्मापयते। भापयते। पातेर्लुक्। पापानेङ्त्यादीनां पुगागमो भवति

राम
७५

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

पुकोपवादः। पाययति। शो तनूकरणे। शाययति। प्रीञ्धूञोर्नुक्। प्रीञ् तर्पणे। प्रीणयति। धूञ् कंपने।
धूनयति। ज्ञानानेर्वा ह्रस्वः। ज्ञापयति। ज्ञपयति। वेडि स्फदी ह्वीता चवक्रेव्या। ज्ञापयते: सप्रतीस्य चवा
इङ् णामो भवति। इङ् भावे इस्यादेशश्च भवति। ज्ञीप्सति। ज्ञप ज्ञाने ज्ञापने च। जिज्ञापयिषति। चुरादेः।
चुरादेर्णिच्। स्वार्थे णिच् प्रत्ययो भवति। चुर स्तेये। चोरयति। पाल रक्षणे। पालयति। चिन्ती संज्ञाने। चे
न्तयति। अर्च पूजायाम्। अर्चयति। अर्चयतः। अर्चयन्ति। मकारानुबन्धादात्मनेपदमपि। णेरङ् द्वि
र्वचनं। अन्यत्राकृतो भूतेऽर्थे इट् प्रत्ययो भवति दिवादिपाठतः। धातोर्द्विर्वचनम्। अङ्कारो गुणप्रतिषेधार्थः
अचुचुरत्। अन्त इति स्थिते। णेः। क्ङिति चेति णेर्लोपो भवति। लघोर्दीर्घः। अङि सति पूर्वस्य लघोर्दीर्घो भव

ति। अचूचुरत्। अचूचुरताम्। अचूचुरन्। विद ज्ञाने। अवीविदत्। अदूदुहत्। अङि लघौ ह्रस्व उपधायाः
अङि सति पूर्वसंबन्धिनो अकारस्य इकारो भवति। उपधायाश्च ह्रस्वो भवति। लघौ धात्वक्षरे सति। अपीप
सा· ७६ चत्। अपीपठत्। अपीपलत्। पाल रक्षणे। पालयति। प्रत्यपीपदत्। घट चेष्टायाम्। मितां ह्रस्वः। घटयति।
अजीघटत्। नरिनः। मकारेतो धातोः अङि उत्कार्यं न भवति। ढौकृ टीकृ गतौ। अडुढौकत्। अटिटीक
त्। ऊढिं करोति ऊढयति। भूते तु ऊढि अत इति स्थिते द्वित्वम्। ढस्य जः। णेर्लोपः। औजिढत्। अङि पू राम
र्वढस्य जः। औजढत्। पा पाने। पादेर्पुक्। पाचिकृत्यस्य धातुसंज्ञा [illegible] यामङ्। णेरिति णेर्लोपः। ह्रादे ७६
रितीकारे कृते द्विर्वचनम्। पत इत्यलोपः। अपीप्यत्। कृपू सामर्थ्ये। कृपेरो लः। कृपो धातोः ऋकार
वयवस्य रेफांशस्य लकारादेशो भवति। कल्पते। ण्यासे। प्रेरितो कल्पयति। भूते तु अचीक्लृपत्॥॥

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

यचीकृपनाम। यचीकृपन। इत्यादि॥ ॥ अथादेशविशेषविनिरूपणं॥ ॥ दृशादेः पश्यादिः ॥
दृशादेर्धातोः पश्यादिरादेशो भवत्यवादौ विषये। दृशिर प्रेक्षणे। अस्य पश्यादेशः। पश्यति। अध्विकर
णत्वा इवति वद्रूपन्नेयम्। पा पाने। पा इत्यस्य पिबादेशो भवति। पिबति। घ्रा गंधोपादाने। अस्य जिघ्रा
देशः। जिघ्रति। ध्मा शब्दाग्निसंयोगयोः। अस्य धमादेशः। धमति लोहं लोहकारः। ष्ठा गतिनिवृत्तौ।
अस्य तिष्ठादेशः। तिष्ठति। दाण् दाने। अस्य यच्छादेशः। यच्छति। म्ना अभ्यासे। इत्यस्य मनादेशः॥
मनति। ऋ गतावित्यस्य रिच्छादेशः। रिच्छति। सृ गतावित्यस्य धावादेशः। धावति। शद्लृ शातने।
इत्यस्य शीयादेशः। शीयते। षद्लृ विसरणगत्यवसादनेषु। अस्य सीदादेशः। सीदति। गमां छः। गमा

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

दीनां छकारो भवति। अवादौ विषये। गच्छति। इषु इच्छायाम्। इच्छति। यमु निपमे। नियच्छति। ज्ञाजनोर्जा।
ज्ञा अवबोधने। जनी प्रादुर्भावे। अनयोर्जा आदेशो भवत्यवादौ विषये। दिवादेर्यः। जायते। ना क्र्यादेः। जानाति।
सा. ७७ जानीतः। ष्ठिवः ष्ठ। ष्ठीवति। प्वादेर्ह्रस्वः। पूञ् पवने इत्यादेरवादौ परे ह्रस्वो भवति। पुनाति। लुनाति।
धुनोति। नेर्विशादेः। निपूर्वाद्विशादेर्धातोरात्मनेपदं भवति। निविशते। विपराभ्यां जेः। विजयते।
पराजयते। संपश्यते। संगच्छते। संशृणुते। संवित्ते। संपृच्छते। आपृच्छते। आङो दोनास्यविहरतो। आ- राम
ङः पूर्वाद्धरतेरात्मनेपदं भवति। ननु मुखप्रसारणे। आदत्ते। मुखप्रसारणे तु मुखं व्याददाति। क्रीडो- ७७
नुसंपरिभ्यश्च। अनुक्रीडते। परिक्रीडते। समः शब्दार्थान्न। सं क्रीडति तूर्यम्। समव विभ्यः स्थः।

ते २ प्रोप १

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

उन्नयते। वितयते २ नोलोपद्भिन्नकारस्यलोपः २

संतिष्ठते। अवतिष्ठते। प्रतिष्ठते। उपान्मन्त्रकरणएव। गायत्र्योपतिष्ठते। ऽकर्मकात्। अन्यत्र गुरुमुपतिष्ठति।
उद्विभ्यां तपः। आङो यमहनः। आयच्छते। आहते। उदश्चरस्त्यागे। सूत्रमुच्चरते वटुः। समस्तृतीयायुक्ता
त्। समपूर्वाच्चरतेरात्मनेपदं भवति तृतीयायोगे। अश्वेन संचरते ग्रामम्। अन्यत्र संचरति धृष्टः। व्यव
परिभ्यः क्रियः। विक्रीणीते। ... उपालम्भे। शपते। अन्यत्र शपति तापसः। ज्ञाश्रुस्मृदृशां सन्नन्ताना
ना सप्रत्ययान्तानामेषा ... पदं भवति। जिज्ञासते। शुश्रूषते। इत्यादि। कर्मव्यतिहारेऽन्यत्र हिंसा
देशात्। विहन्ते वादिनः। स्वच्छ व्यतिभवते। क्रमः सोपसर्गस्यैवेदं वृत्तावक्रमे। संक्रामति। व्याङ्परिभ्यो
रमः। विरमतीत्यादि। धृञः स्यसनोर्वा। धत्तुवर्त्तने। वृधु वृद्धौ। स्यद्धुशब्दकुत्सायाम्। वर्त्स्यति। वर्त्स्य
ते। वत्स्यति। वर्धिष्यते इत्यादि। मुचादेर्नुम्। मुचादेर्नुमागमो भवति। शे परे। मुञ्चः मोन्नणे।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सा०
७७

दीनां छकारो भवति। अवादौ विषये। गच्छति। इषु इच्छायाम्। इच्छति। यमु नियमे। नियच्छति। ज्ञाजनोर्जा।
ज्ञा अवबोधने। जनी प्रादुर्भावे। अनयोर्जा आदेशो भवत्यवादौ विषये। दिवादेर्यः। जायते। ना क्र्यादेः। जानाति।
जानीतः। श्रुवः शृ। शृणोति। प्वादेर्ह्रस्वः। पूञ् पवने इत्यादेर्नाप्रत्यये परे ह्रस्वो भवति। पुनाति। लुनाति।
धुनोति। निविशादेः। निपूर्वाद्विशादेर्धातोरात्मनेपदं भवति। निविशते। विपराभ्यां जेः। विजयते।
पराजयते। संपश्यते। संगच्छते। संशृणुते। संविन्ते। संपृच्छते। आपृच्छते। आङो दोनास्यविहरणे। आ
ङ्पूर्वाद्ददा रात्मनेपदं भवति ननु मुखविप्रसारणे। आदत्ते। मुखविप्रसारणे तु मुखं व्याददाति। क्रीडो
नुसंपरिभ्यश्च। अनुक्रीडते। परिक्रीडते। समः शब्दार्थान्नात्। संक्रीडति तूर्य्यम्। समवविप्रः स्थः

ते २ प्राप १

राम
७७

उत्तपते। वितपते २ नोलोपइतिनकारस्यलोपः २

संतिष्ठते। अवतिष्ठते। प्रतिष्ठते। उपान्मन्त्रकरणे एव। गायत्र्योपतिष्ठतेऽर्कम्। अन्यत्र गुरुमुपतिष्ठति।
उद्विभ्यां तपः। आङो यमहनः। आयच्छते। आहते। उदश्चरस्त्यागे। सूत्रमुच्चरते वटुः। समस्तृतीयायुक्ता
त्। समपूर्वाच्चरतेः। आत्मनेपदं भवति तृतीयायोगे। अश्वेन संचरते ग्रामम्। अन्यत्र संचरति पृष्ठः। व्यव
परिभ्यः क्रियः। विक्रीणीते। शपउपालम्भे। शपते। अन्यत्र शपति तापसाः। ज्ञाश्रुस्मृदृशां सन्नन्तानाम
ता। सप्रत्ययान्तानामेषामात्मनेपदं भवति। जिज्ञासते। शुश्रूषते। इत्यादि। कर्मव्यतिहारेऽन्यत्र हिंसा
देशात्। विदन्ते वादिनः। अत्र व्यतिभवते। क्रमः सोपसर्गस्य वेदीर्घता वक्रत्वा। संक्रामति। व्याङ्पर्युपेभ्यो
रमः। विरमतीत्यादि। वृद्भ्यः स्यसनोर्वा। वृतु वर्त्तने। वृधु वृद्धौ। स्यधु शब्दकुत्सायाम्। वर्त्स्यति। वर्त्तिष्य
ते। वर्त्स्यति। वर्द्धिष्यते इत्यादि। मुचादेर्नुम्। मुचादेर्नुमागमो भवति। शे वा हे परे। मुञ्च मोन्ते।

इदितः। इदितो धातोर्नुमागमो भवति। टुनदि समृद्धौ। भ्वादित्वादप् नन्दति। १

तुदादेरः। मुंचति। विदॢ लाभे। विन्दति। वघशि वादनसुषोः। वृन्दते। शकि शंकायाम्। शंकते। शमां दीर्घः।
शमादीनां दीर्घो भवति श्यवादौ परे। शमु दमु उपशमे। दिवादेर्यः। शाम्यति दाम्यति। भ्राम्यति। ताम्यति।
दुष वैकृत्ये। दूषयति॥ य्वोः॥ यकारे परे धातोरोकारस्य लोपो भवति। दो अवखण्डने। द्यति। षो अन्तकर्म
णि। स्यति। शो तनूकरणे। श्यति। पोनुन। पवर्गादुत्तरस्य मकारस्य उर् भवति। मृङ् प्राणत्यागे। य्वोर्विहस
इति दीर्घः। मुमूर्षति। ममार। सपरोन्तादेर्मृयतेः परस्मैपदम्। तुदादेश्च तु णोकिसादेः। वदुणति वादि
नां ३ गणानां मध्ये हकारादेर्वर्ज्ज्य सप्रत्याहारादेश्च प्रत्ययस्य द्भ भवति तुदादेः परस्य। अदादित्वादप् लुक्। रुदिर्
अश्रुविमोचने। रोदिति। रुदितः। रुदन्ति। रुद्यात्। रोदितु। रुदादेर्दिस्योरीडागमो वा वक्तव्यः। अरो
दीत्। अरोदत्। अदादित्वाद् अगमः। श्वस प्राणने। अन च। श्वसिति। प्राणिति। ञिष्वप् शये। स्वपिति।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

यन्त्रमन्त्र हसनयोः। यन्त्रिति। यन्त्रितः। यन्त्राद्देरन्त्रो द्वनउस्। यन्त्र। जागृ शासु चकासृ दरिद्रा पंचानां
अन्त्र उस्यस्माद्भवति। अन उस् भवति। यन्त्रति॰ चकासति॰ जाग्रति॰ दरिद्राद्देरितो लोपश्च ङि॰ति॰ दरिद्रा
डुर्गताविस्याद्देर्गुतौ शाकारस्येकारो भवति ङि॰ति हसे परे॰ आलोपश्च ङि॰ति स्वरे परे। दरिद्राति॰ दरिद्रितः॰
दरिद्रति। शास्ति। शिष्टः। शासति॰ ईड ईशोः स्वे इड् नेत्वः। ईड् स्तुतौ॰ ईश ऐश्वर्ये। अनयोः सका
रे ध्वशब्दे च परे इड्भवति। ईडिते इति स्थितौ टकारः। ईडे। ईडाते। ईडते। ईडिषे। ईडाथे। ईडिध्वे। ईडे। ई
ड्वहे। ईड्महे। ईश ऐश्वर्ये। ईष्टे। ईशाते। ईशते। इत्यादि। ओरौ। ओकारस्यौकारो भवति पि॰ तिस्मिन्न
वाहे। यु नु नु स्तु ष्पईषां। यौति। यवीति। नु स्तुतौ। नौति। नवीति। स्तौति। स्तवीति। स्तुतः। स्तुवन्ति। स्तौषि॰

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi.

लोपस्त्वनुदात्ते तनाम् । अनुदात्तानां तनादीनां च अमस्य लोपो भवति क्ङिति झसे परे । हन्ति । हतः । गमां
स्वरे इत्युपधालोपः । नमः । नमः प्रत्ययान्तात्परस्य नकारस्य लोपो भवति । हि हिसि हिंसायाम् । तुधादेर्नम् । हि
नस्ति । हिंस्तः । हिंसन्ति । इत्यादि । भञ्जू आमर्दने । भनक्ति । भंक्तः । भञ्जन्ति । भुनक्ति । भुंक्तः । भुञ्जन्ति ॥
अपि रञ्जि दंशि षञ्जि ष्वञ्जाम् । रञ्जादीनामपि प्रत्यये परे नकारस्य लोपो भवति । रञ्ज रागे । रजति । दंश द
शने । दशति । षञ्ज सङ्गे । सजति । ष्वञ्ज परिष्वङ्गे । स्वजते । इत्यादि । विदो नवा नान्तादीनां णवादिर्वा । वि
द ज्ञाने एषां न्तादीनां च वानां णवादिर्नवको वा भवति । वेद । विदतुः । विदुः ॥ वेत्थ । विदथुः । विद । वेद । विद्व ।
विद्म । वेत्ति । वित्तः । विदन्ति । वेत्तेरन्तो वा रुट् । व्यति विद्रते । संविद्रते । विद्यात् । विद्यास्ताम् । विद्युः । वेत्तु ।

वित्ता ह। वित्ताम्। विदन्तु। विद्धि। वित्तात्। वित्तम्। वित्त। वेदानि। वेदाव। वेदाम। अवेत्। अवेद्॥ अवित्ताम्·
स्या विदुस्यनउस्। अविदुः। दः स इति विकल्पेन सत्वम्। अवेः। अवेत्। अवेद्। अवित्तम्। अवित्त। अवेदम्· अ
विद्व। अविद्म। अस्ति। नमसोस्या इत्यकारलोपः। स्तः। सन्ति। सोसः। सकारस्य लोपो भवति सिपि। असि। स्थः·
स्थ। अस्मि। स्वः। स्मः। स्यात्। स्याताम्। स्युः। स्याः। स्यातम्। स्यात। स्याम्। स्याव। स्याम। अस्तु। स्तात्। स्ताम्।
सन्तु। जहेधिशाधयः। हन्तेः ज हि शब्दो· अस्तेरेधि शास्तेः शाधि शब्दो निपात्यते हि विषये। एधि। स्तम्·
स्त। असानि। असाव। असाम। अस्तेरीद्। अस्तेः परयोर्दिस्योरीडागमो भवति। आसीत्। आस्ताम्। आसन्·
आसीः। आस्तम्। आस्त। आसम्। आस्व। आस्म। लिह आस्वादने। होढः। ष्टुमिः ष्टुः। उपधायालघो गुणः·
लेढि इति स्थिते। ढिढोलोपो दीर्घश्च। ढकारे परे ढकारस्य लोपो भवति पूर्वस्य च दीर्घः। लेढि। लीढः। लिहन्ति·

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi.

लेन्हि। लीढः। लीढ। लेह्मि। लिह्वः। लिह्मः। लिह्यात्। लेढु। लीढात्। लीढम्। लिहन्तु। लिहो हेरिद्धावत्वः।
लिहिहि। पदान्तमाश्रित्य होढ इति ढत्वम्। झसाद्धिहेः। धत्वम्। लीढि। लीढात्। लीढम्। लीढ। लेहानि। लेहा
व। लेहाम। अलेट्। अलीढाम्। अलिहन्। अलेट्। अलीढम्। अलीढ। अलेहम्। अलिह्व। अलिह्म। च
सा॰ क्षिङ् व्यक्तायां वाचि। चष्टे इति स्थिते। स्कोराद्योश्च। संयोगाद्योः सकारककारयोर्लोपो भवति धातो
८० र्झले परे नाम्न श्वासे पदान्ते च। अन्यत्र सोऽजः। लक्षते। लक्षीध्वे। व्याचष्टे। व्याचक्षाते। व्याचक्षते। चक्षेः ते ध
कः स इति कत्वम्। व्याचक्षे। व्याचक्षाथे। व्याचड्ढ्वे। व्याचक्षे। व्याचक्ष्वहे। व्याचक्ष्महे। व्याचक्षीत। व्या राम
चष्टाम्। व्याचक्षाताम्। व्याचक्षताम्। चकासृ दीप्तौ। चकास्ति। चकास्तः। चकासति। यङ्लोऽदेर ८०
न्तोदन्त इति सूत्रेणान्त इत्यस्याद्भवति। चकास्यात्। चकास्तु। इत्यादि। दिधिषस्यन्त स्यिपिवा॥

दिस्योर्हसादिति सूत्रेण दिस्योर्लोपः। अचकात्। अचकास्ताम्। अचकासुः। सिपि वा तकारः। अचकात्·
अचकाः। ख्या प्रकथने· आख्याति। आख्यायात्। आख्यातु। आख्यात्। आख्याताम्। आख्युः। मृजे
र्वृद्धिः पिति च। मृजूष शुद्धावित्यस्यापि वृद्धिर्भवति। एतत्कालोपलक्षणमन्यत्रापि भवति। मार्ष्टि·
मृष्टः। मृजन्ति। मृज्यात्। मार्ष्टु। मार्ट्। अमार्ट्। निजां गुणः। निजादीनां पूर्वस्य गुणो भवति लुकि सति।
निजिर शोचपथभावयोः। ङुहोत्यादित्वाद्द्विर्वचनम्। नेनेक्ति। नेनिक्तः। नेनिजति। हेपिति
अन्नइत्यस्यात्। अवनेनिक्ते। अवनेनिजाते। अवनेनिजते। अवनेनिक्ताम्। अवनेनिजाताम्। अवनेनि
जताम्। अवनेनिग्ध्वा इत्यादि। अवानेनिक्त। अवानेनिजाताम्। अवनेनिजते त्यादि। विजिर पृथग्भावे।

अ४ अवनेनिजीत २

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

वेवेक्ति। विष्लृ व्याप्तौ। वेवेष्टि। वेविष्टः। इत्यादि। अप्रोरिः पूर्वस्य। अगतौ पालनपूरणयोरित्येतयोः पूर्वस्येकारो
सा॰ भवत्यपि विषये। व्याङ्पूर्वः। व्यापिपर्त्ति। व्यापिपृयात्। व्यापिपर्त्तु। अप्रोर्दिस्योर्वाऽगमः। व्यापिपरत्। व्यापिपः।
८१ व्यापिपृताम्। व्यापिपरुः। अगतौ। असवर्णे स्वरे पूर्वेकारस्य यादेशो वक्तव्यः। इयर्त्ति। इयृतः। इयृति। इयर्षि
इत्यादि। इयृयात्। इयर्तु। स्वरादित्वाद्द्वितीयोऽगमः। ऐयः। ऐयृताम्। ऐयरुः। ऐयृत। इति स्थिते अरिप्रोर्दिस्यो रम
रितिवाऽगमः। ऐयरत्। इणगतौ। एति। इतः। यन्ति। इयात्। एतु। आइहि। एहि। अयानि। ऐत्। ऐताम्। आयन्। ८१
ऐः। ऐतम्। ऐत। आयम्। ऐव। ऐम। इयाय। ईयतुः। ईयुः। इययिथ। इयेथ। ईयथुः। ईय। इत्यादि॥
धातूनामनन्तत्वान्नानार्थत्वाच्च सर्वधातूनभिधातुमशक्यम्। इत्यलमाख्यातव्यापनेन ॥ ८ ॥

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

अथ कृदन्तप्रक्रिया निरूप्यते ॥ कृत्कर्तरि । वक्ष्यमाणः प्रत्ययः कृत्संज्ञकः स च कर्तरि भवति ॥१॥
तृन्तृचौ । धातोस्तृन्तृचौ प्रत्ययौ भवतः । पच् इति स्थिते । नाम संज्ञायां स्यादिविभक्तिः । पक्ता । पक्तारौ । पक्ता
रः । हर्ता । कर्ता । कृतः । धातोः परस्य कृत्प्रत्ययस्य वसादेरिडागमो भवति । भविता । भवितारौ । भवितारः ।
एधिता । ऊदितो वा । ऊदितो धातोरिड्वा भवति । गोपिता । गोप्ता । गुपू रक्षणे । षह मर्षणे । वह प्रापणे ।
सहवहोरोदवर्णस्य । सहवहोरनुपधाया अकारस्यौकारादेशो भवति । सोढा । वोढा । युवोरनाकौ । यु
वु इत्येतयोरनाकावादेशौ भवतः । यथासंख्येन । पचतीति पाचकः । णित्वादन्त उपधाया वृद्धिः । पठ
तीति पाठकः । कारकः । लावकः । पुमिश्रतो मिश्रतोपि । पौतीति यावकः । याजकः । इत्यादि । नाम्युप
धात्कः । नाम्युपधाद्धातोः कप्रत्ययो भवति । ककारो गुणप्रतिषेधार्थः । भिदः । क्षिपकोरतो ।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi.

सा
८२

न्द्विपः।जानाते खकः।जानाते र्धातोः कप्रत्ययो भवति।जानातीति ज्ञः।आतोनपी त्याकारलोपः।पचिन
न्दिग्रहादेर्युल्णिनि।पचादेर्नन्द्यादेर्ग्रहादेश्च अयुल्णिनि इत्येते प्रत्यया भवन्ति।यथासंख्येन।पचः।दे
वः।देवः।सेवः।टुनदि समृद्धौ।नन्दयतीति नन्दनः।रमु क्रीडायाम्।रमणः।रोर्युल्।रौतीति रवीति वा रावणः।
ग्रहणातीति ग्राही।विरावी।दृशादेः शः।दृशादेर्धातोः शः प्रत्ययो भवति।शकारः शित्कार्यार्थः।शिति च लु
प्ते।शिति प्रत्यये परे यत्तु लुप्त कार्यमुक्तं तद्भवति।पश्यः।धयः।गमां स्वरे इत्यकारलोपः।गां हन्तीति गोघ्नः।
ज्वलादेर्णः।ज्वलादेर्धातोर्णः प्रत्ययो भवति।ज्वल दीप्तौ।ज्वालः।क्वचिद्णः।ज्वल इत्यपि भवति।तपती
ति तापः।पथि गतौ।पाथः।कर्मण्यण्।कर्मणि उपपदे अण् प्रत्ययो भवति।कुम्भं करोतीति कुम्भकारः।
ग्रंथकारः।आतोऽः।आकारान्ताद्धातोः कर्मण्युपपदे ङप्रत्ययो भवति।गोदः।धनदः।नाम्नि च।नाम स

राम
८२

द्वेभ्यु ज्यमानेड प्रत्ययो भवति। द्वाभ्यां मुखेन नासिकाभ्यां पिबतीति द्विपः। द्विजः। गृहस्थः। दुगतौ। सुचं
ष्ठेप्रयुज्यमाने ड प्रत्ययो भवति। द्वाभ्यां मुखेन नासिकाभ्यां पिबतीति द्विपः। द्विजः। गृहस्थः। दुगतौ। सुचं
द्रवतीति स्रूद्रुः। स्रुचः स्रूद्रे। स्रुच इत्येतस्य स्रू इत्यादेशो भवति द्रु परे। उरसः सलोपो मुम्बा वक्तव्यः। उरसाग
च्छतीति उरगः। उरङ्गः। तुरगः। तुरङ्गः। विहायसो विहच। विहायस् शब्दस्य विह इत्यादेशो भवति। चकारात्त
रस् शब्दस्य तुरादेशो भवति। विहगः। विहङ्गः। अडौ। नाम्नि कार्ये सति अकार डकारौ प्रत्ययौ भवतः। डको
रईवर्थः। अस्थिहरः श्वा। कवचहरः क्षत्रियकुमारः। धनुर्धरः। कुन्तुचरः। स्त्री चेत् कुन्तुचरी। इ। ख। खि। धा
तोर्नाम्नि कार्ये सति इ। ख। खि। इत्येते प्रत्यया भवन्ति। स्तंबं करोतीति स्तंबकरिर्व्रीहिः। आढ्यमाप्तौ। देवाना
प्नोतीति देवापिः। खिति पदस्य। खिति प्रत्यये परे पूर्वपदस्य मुमागमो भवति। क्षेमंकरः। प्रियंवदः। आत्मं
मरिः। एजां खश। एज इत्यादीनां खश प्रत्ययो भवति। खकारो मुमागमार्थः। शकारः स्व तु र्वत्का

नेइ

पर्यौर्यः। जनं र जयतीति जनमेजयः। पण्डितंमन्यः। खुट् करोतो। करोतो ये खुट् प्रत्ययो भवति। नमः
क्रियते अनेनेति नमंकरैः चूनमः। स्थूलंकरोतीदृक्षि। मडांविता। मज्जादीनां धातूनां कर्तरि विता प्रत्ययो
सा॰ भवति। वेः। वेलीयो भवति। मजे सेवायाम्। अर्ह्यं मजतीत्यर्ह्यभाक्। तन्वभ्राट्। वह प्रापणे। भारवाट्। वाहो वौश
८३ सादौ स्वरे। वाहो वा इत्यस्य ओकारादेशो भवति शसादौ स्वरे परे। भारौहः। भारौहा। भारवाड्भ्यामित्यादि। सहेः ष
७४ सोढि। सहेः सकारस्य [illegible] कारादेशो भवति ढकारे परे सति सेपदान्ते च। तुराषाट्। तुराषाड्। तुरासाहौ। तुरा राम
साहः। सोनोशानोः। शानोर्मकारस्य नो भवति झिति परे। शामु इमु उपशमे। प्रशान्। प्रशान्तौ। अमूतं नवै ८३
कृभ्वस्तियोगे च्विः। होरीर्ह ई वास्य। च्वि प्रत्यये परे पूर्वस्य दीर्घो भवत्यकारस्य च ईकारः। अशिशुं शिशुं
संक्रियते शुतिशिशुनी कारोमः। अशुक्लस्य भवति शुक्लीभावः। असहायः सहायः स्यात् सहायीस्यात्॥ त ३

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

हेतू कृतम्। औसलोपश्च। अमनीभावः। डाबृक्षचिह्नं कृत्वः। दुःखा करोति। आतो मनिन्क्वनिब्वनिपः। आको
रन्ताच्छातोर्मनिन्क्वनिप्वनिप् इत्येते प्रत्यया भवन्ति। कर्तरि। सुष्ठु ददातीति सुदामा। राजन् शब्दवत्प्रक्रिया॥
स्थामा॥ स्थापा गादीनामी भवति क्ङिति परे। न क्विपि। इश्च ई श्च ई। सुष्ठु पिबतीति सुपीवा। क्विप्। सर्वधातुभ्यः क्वि
प् प्रत्ययो भवति। ह्रस्वस्य पिति कृति तुक्। पिति कृति परे ह्रस्वस्य तुगागमो भवति। क्विपः सर्वापहारी लोपः। कर्मकृ
ता अग्निचित्। देवस्तुत्। सोमपाः। सर्वदृक्। दिशां क इति कत्वम्। त्रिजसे वा याम्। प्रश्नादेर्दीर्घता च वक्तव्या। क्वि
पि परे। सुश्रीः। नत्वप्राट्। णह बन्धने। क्विपि परे नहधुपोपसर्गस्य दीर्घता वक्तव्या। नहो ध इति धकारस्य तकारः॥
उपानत्। कर्तुं चिकीर्षतीति कर्तुं चिकीः। यत इति सकारस्याकारस्य लोपः। संयोगान्तस्य लोपः। र्वोर्दि हस ई
तिदीर्घः। रेफस्य विसर्गः। अस्य गिर् शब्दवत्प्रक्रिया। ध्यायतेः क्विपि संप्रसारणम्। दृशोऽपक्षु संकोचोपमाने
सुधीः

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi.

कार्ये। दृशेर्धातोः टक्सकौ प्रत्ययौ भवतः। चकारात्क्विप् कार्ये अर्थे उपमाने सति॥ आ सर्वादेः। तेषु प्रत्य
येषु सर्वादेः परस्य आत्वं भवति। अन्य इव दृश्यते इत्यन्यादृशः। अन्यादृक्षः। अन्यादृक्। स इव दृश्यते इति
सा. तादृशः। तादृक्षः। तादृक्। किमिदमोः कीश्। किम्शब्दस्य इदम्शब्दस्य च की ईश् इत्येतावादेशौ भवतः।
८४ शाकारः सर्वादेशार्थः। कीदृशः। कीदृक्षः। कीदृक्। ईदृशः। ईदृक्षः। ईदृक्। भवादृशः। भवादृक्षः। भवादृ
क्। भवच्छब्दस्य सर्वादित्वादाकारः॥ णिनिरतीते। धातोरतीते काले शीले चार्थे णिनिप्रत्ययो भवति। अग्निष्टो
मेनेष्टवान् अग्निष्टोमयाजी। क्विब्वनिप्ङ्वाः। धातोरतीते काले क्विप् वनिप् ङ् इत्येते प्रत्यया भवन्ति। ब्रह्महा। राम
यज्वा। ससिजम्। सर्वगः। सामगः। क्तक्तवतू। धातोरतीते काले क्तक्तवतू प्रत्ययौ भवतः। भावकर्मणोः ८४
क्तः। भावे कर्मणि च क्तप्रत्ययो भवति। कटः कृतः। कटं कृतवान्। नपुंसके भावे क्तः। भावे क्तप्रत्ययो

प्रवति २

नपुंसकलिंगे। आगतम्। स्थितं देवदत्तेन। लोपस्त्वनुदात्ततनामितिमकारलोपः। स्यामीतिइकारः।
गत्यर्थादिकर्मकाद्यकर्त्तरि क्तः। गत्यर्थादिकर्मकाद्धातोः कर्त्तरि क्तप्रत्ययोभवति। आदितः। श्वितः।
शान्तः। दान्तः। क्तोवासेट्। सेट् क्तप्रत्ययोवाकिद्भवति। प्रद्योतितः। प्रद्युतितः। रोदितः। रुदितः। मुषितः।
मोषितः। क्तिन्वपन्त्वेस्यामीति ईकारः। ग्रहां ङ्किति चेति सम्प्रसारणम्। गृहीतः। क्तिन्वाभावे न संप्रसा
रणं न ईकारः। ग्रहितः। नोदितः। नुदितः। क्षितः। उवर्णान्तादृवर्णान्ताच्च श्रिञश्च धातोः परस्य कितः प्रत्य
यस्य इट् न भवति। भूतः। स्तुतः। कृतः। हृतः। श्रितः। आदीदितः। आदित ईदितश्च इट् न भवति शीतान्त
वर्त्तमानेपि। दत्तस्य नो दश्च। दकारादुत्तरस्य कितस्तशब्दस्य नत्वं भवति। दकारस्य नकारः। ञिमिदा स्ने
हने। मिन्नमन्नं तैलेन वर्त्तते। ञिष्विदा गात्रप्रक्षरतो। आयासेन प्रस्विन्नः। ञिक्ष्विदा संचूर्णने। न्हि

श्रवदत्तम्५

स्तः।अदो जग्ध।जग्धम्।रः।रेफादुत्तरस्य तकारस्य नत्वम्भवति।शॄ हिंसायाम्।ऋत इद्धा।छोर्विहस
इति दीर्घः।विकीर्णम्।ज्ॄष वयोहानौ।जीर्णम्।कीर्तं शीर्णम्।ल्वादिभ्यो दितः।ल्वादिभ्यो दितश्च धा
सो॰ ८५ तोस्तकारस्य नो भवति।लूनः।ह्रीह्रयौ।ह्रीणः।ग्लानः।म्लानः।हीनः।प्यायः पी।पीनः।ओदितश्च।दु
न्यस्य दुवतिनकारादेः क्तिनि परतः।दत्तः।दत्तवान्।स्वरान्तो वा।स्वरादुत्तरस्य दादुत्तरस्य तो वा भवति
क्तिनि परे।प्रत्तः।प्रदत्तः।अवत्तम्।यजां यवरां ग्रामित्यादिना सम्प्रसारणम्।शशषराजादिनेति षत्वम्।
इष्टम्।इष्टवान्।इवपूर्वी जनन्तु संतानौ।उप्तं वीजम्।बहुप्रा पत्नी संप्रसारणो।होढ इति ढत्वे कृते तथो राम ८५
र्धः।ढुत्वम्।ढलोपो दीर्घश्च।ऊढो नदुहा पगुः।व्येञ् संवरणे।संवीतम्।ह्वेञ् स्पर्धायां शब्दे।आहूतः।व
दस्य क्तायां वाचि।उदितः।उक्तः।वसि न्दु घोषि८।उषितः।न्दु षितः।सुप्तः।श्वाण्णापानिपात्यन्ते।श्वात्तः।

त्रातः। त्रैङ्पालने। ह्रीलज्जायाम्। ह्रीणः। ह्रीतः। द्रीणः। निर्वाणः। वागतिगन्धनयोः। खनखनने।
खातः। संपर्युपेभ्यः करोतेर्भूषणे सुट्। संस्कृतः। परिष्कृतः। उपस्कृतः। जनै जनी। जातः। पचो वः।
पक्वः। पक्ववान्। शुषेः कः। शुष्कः। शुष्कवान्। स्फायः स्फी। स्फीतः। क्तसुकातौ णवेवत्। क्तसुकातौ
प्रत्ययौ भवतोऽतीते काले तौ च णपूर्वत् भवतः। णवादिवत्क्वसौ द्विर्वचनम्। यथा णप् परस्मैपदे तथा क्वसुः
यथात्मनेपदे ए तथा कानः। बिभिद्वान्। चकृवान्। चक्राणः॥ शतृशानौ तिपूते वा क्रियायाम्। क्रियाप
दे गम्यमाने शतृशानौ प्रत्ययौ भवतः। तौ च तिपूते इतिवत् परस्मैपदात्मनेपदे भवतः। पचन्नास्ते। पचंस्ति
ष्ठति। गायन् गच्छति। मुगानेतः। अकारस्य आने परे मुगागमो भवति। पचमानः पिबति। यजमानः स्तौति। मन
ज्ञाने। मन्यमानः। आसेरानई। आसीनः। वादीपोः शातुः। अवर्णात्परस्य शा-तुर्वा नुमागमो भवति।।।।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

स४ ददति३

ईकारे ईपि च परे। तुदभ्य यनो तुदादेः। तुदत्। तुदती। तुदन्ती। स्त्रियाम्। तु दन्ती। तुदती वा। अव्ययो
सा· र्नित्यम्। अपूकर्त्तरि दिवादेर्यः। इति द्वयोर्नित्यं नुमागमो भवति। भवन्ती। दीव्यन्ती। दृश्यते। द्विनुन्नी
८६ नां यन्नादीनां च शतुर्नुम् भवति वेधो वक्तव्यः। दौ वा। ददत्। ददती। ददन्ती। दधत्। जाग्रत्। दरिद्रा कुर्ग
तो। दरिद्रत। अनुशान्। विदेर्वा वसुः। विदेर्ज्ञातेः शतृविषये वा वसुप्रत्ययो भवति विद्वान्। विदन्।।
अत्रभवत्तत्रभवच्छब्दौ पूज्यार्थे निपात्येते। अत्रभवन्तो भदन्तमिश्राः। तत्रभवद्भिर्भगवत्पादैर्भणितम्।
शीलेतृन्। धातोस्तृन् प्रत्ययो भवति शीले स्वभावे धीकरणशीलः कर्त्ता। इ स्नुक्नु। इष्णुस्नुक्नु इत्वे राम
ते प्रत्यया भवन्ति। अलंकरिष्णुः। निराकरिष्णुः। अनुपरिक्रमे। अभिष्णुः। विष्णु व्याप्तौ। व्यापनशीलो ८६
विष्णुः। भविष्णुः। भ्राजिष्णु। वर्हमवर्ति। सहिष्णुः। जिष्णुः। स्थास्नुः। गृध्नुः। धृष्णु अभिकांक्षायाम्।

स्नु३ व४

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

वाकोकणाः। शीलेर्थे षाक उ उकण् इत्येते प्रत्यया भवन्ति। वृञ् वरणे। वराकः। षकार ईवर्थः। वराकी॥
भिक्ष याञ्चायाम्। भिक्षाकः। भिक्षुः। सान्ताशंसभिक्षोश्च। सप्रत्ययान्ताद् आशंस धातोश्च उ प्रत्ययो भ
वति। विवक्षुः। आशंसुः। जिहीर्षुः। कमु कान्तौ। कामुकः। भिक्षुकः। भावुकः। नमादेरः। नमादेर्धातोरप्र
त्ययो भवति। नम्रः। हिंस्रः। वसादेः। वस्मरः। स्मरः। अद्मरः। भासादेर्घुरः। भासते भास्वरः। भंगुरः। पद
ऊकश्च। पद ज्ञातो ऊक प्रत्ययो भवति शीलेर्थे। लूकः। तत्सनियोगेन लुग् भवति। यायजूकः।
दंदशूकः। वावदूकः। आदृतः कि र्द्वित्वं च भूते। आकारान्तादृकारान्ताच्च धातोः शीलेर्थे भूते काले कि प्र
त्ययो भवति धातो र्द्विर्वचनं। पपिः सोमं पपिर्वहुः दधिर्गाश्च चक्रिर्दुतं मूयाडकान्वत्रितानहिः पोतरी
के महाहिज्ञान्। सहतोणादयः। सर्वस्मिन्काले उणादयः प्रत्यया भवन्ति। करोतीति कारुः।।।।।।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सा
८७

वा गतिगन्धनयोः। वातीति वायुः। आतोयुक्। कुश आह्वाने। क्रोशतीति क्रोष्टा। तुप्रत्ययः। अव रक्षणपालने।
अवतीति ओम्। मक् प्रत्ययः। कित्वात् संप्रसारणम्। ऊकारः। अत सातत्यगमने। मनिण् प्रत्ययः। अतती
त्यात्मा। पृ हि पृंहि पृ क्षौ। पृह त्वा द्वृ ह णात्वात्। ब्रह्म। मनि उपधाया ऋरः। मनि प्रत्यये परे उपधाया ऋ
कारस्यारे फो भवति। ध्रियते धारयति वा धर्मः। मप्रत्ययः। भ्रादेर्नुलिः। धू धूञ् कंपने। धूयते धूलिः। अगि
रगि लगि गत्यर्थाः। ह्लानार्थाश्च। अगतीति अंगुलिः। इदितो वेति नुमागमः। आगमिष्यतीति आ
गामी। भावे णिन् प्रत्ययो भवति। भविष्यतीति भावी। ईश ईश्वरः। वरप्रत्ययः। स्थावरः। राजादेरन्। रा
जा। युवा। युमिश्र। तोऽमिश्र। तेपि। अनुप्रत्ययः। नुधातोरिति। उक्षा। वचादेरस्। वचः। सरः। तेजः। मह

भावे अण् प्रत्ययः २

राम
८७

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

पूजायाम्‌ महः। सौकार्य्ये केलिमः। सुखेन क्रियते सुकरम्। न स्वभावः सौकार्यं तस्मिन्न
र्थे केलिमः प्रत्ययो भवति। कित्वान्न गुणः। भेत्तुं सुकरं भिदेलिमं काष्ठम्। सुखेन पच्यन्ते प
चेलिमा माषाः॥ उणादयो परिमिताः। प्रयोगमनुसृत्य प्रयोक्तव्याः। तुमर्थ तदर्थायां भ
विष्यति। धातोर्भविष्यति काले तुम्‌ प्रत्ययो भवति तदर्थायां क्रियायां गम्यमानायाम्। भोक्तुं
व्रजति। पठितुमीहते। स्नातुमीहते। घञ्‌ भावे। धातोर्भावेऽर्थे घञ्‌ प्रत्ययो भवति ञित्वाद् वृद्धिः॥
चजोः कगौ घिति। चजोः ककारगकारौ भवतः घिति परे। पाकः। त्यागः। विभागः। यागः। इण
गतौ। अयनं आयः। भवं भावः। दावः। पावः। आतो युक्। संज्ञायामकर्तरि च। कर्तृवर्जिते

नं १

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi.

सा॰
८८

कारकेभावेकर्मणिचघञ्प्रत्ययोभवतिसञ्ज्ञायांविषये।प्रतिकार्यमाह्रियतइतिप्रत्याहारः॥
दीयतइतिदायः।विक्रीयतेऽनेनेतिविकारः।स्वरादेः।स्व[illegible]रान्ताद्धातोरप्प्रत्ययोभवतिभा
वादौ।चयनंचयः।संचीयतइतिसञ्चयः।हु॰स्तुतौ।स्तवः।नुस्तु[illegible]तौ।नवः।उन्नयः।नूविक्षेपे
क्रियतेविक्षिप्यतेकर्मादिभिरितिनयः।मदर्थे।मदादीनामप्प्रत्ययोभवतिभावादौ।मदीहर्षे।मदः।
प्रमद्यतेऽनयेतिप्रमदा।पणः।शमुउपशमे।शमनंशमः।दमुदमने।दमनंदमः।यमउपरमे।य
मनंयमः।विभ्रवन्धने।विश्रोभ्यतामिनीतइतिविव[illegible]पं[illegible]।मूर्त्तौघनः।मूर्त्तौकाठिन्येपरिच्छेदेचाभि
धेयेहन्तेरप्प्रत्ययोभवतिभावादौहन्तेर्घनादेशश्च।मूर्त्तंकठिनंदधि।दधिघनः।परिच्छिन्नस्तोकं

राम
८८

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सैन्धवं सैन्धववनः। वर्णविपर्ययश्च। अप्रत्यये परे वर्णानां हसानां विपर्ययो भवति। हिंसि हिंसायाम्। हिनस्तीति सिंहः। इदित्वान्नुम्। ट्वितोऽथुः। ट्वितो धातोरथुप्रत्ययो भवति भावादौ। टुवेपृ कम्पने। वेपथुः। टुन्होपृ न्होपतौ। न्होपथुः। टुओश्वि गतिवृद्ध्योः। श्वयथुः। ड्वितः क्त्रिमक्नेते। ड्वितो धातोः क्त्रिमक्प्रत्ययो भवति तेन धात्वर्थेन कृते अर्थे वाच्ये सति। क्रियया निर्वृत्तः। कृत्रिमो ब्दरः। सम्भूत्रिमयुद्धम्। नङ्। धातोर्नङ्नकौ इत्येतौ प्रत्ययौ भवतः। भावादौ। यती प्रयत्ने। यतनं यत्नः। प्रछ्ःश्ने।।। प्रछ इत्येतस्य शकारादेशो भवति नकारे। प्रश्नः। स्तोः श्चुभिः श्चुः। यज देवपूजायाम्। यज्ञः। आतो नपीत्याकारलोपः। विधिः। निधिः। सन्धिः। आधिः। अम्भोनिधिः। युट्। धातोर्युट्प्रत्ययो भवति

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

भावे। करणम्। हरणम्। दानम्। भूषणम्॥ उदः स्यादेः सलोपश्च। उदः परस्य स्यादेर्वीतोः सस्य लो
सा. पो भवति। उत्थानम्। उत्तम्भनम्। ष्टम्भ रोधने। साधनाधारयोः। साधने आधारे चार्थे युट् प्रत्ययो भव
८९ ति। पच्यते अन्नमनेनासौ पचनोऽग्निः। पच्यते अन्नमस्यां पचनी स्थाली। ईषद्दुःसुषु खल्यू। ईष
दादिषु प्रयुज्यमानेषु खलयू इत्येतौ प्रत्ययौ भवतः। भावादौ लकारो भेदज्ञापनार्थः॥ खकारो
गुणप्रतिषेधार्थः। ईषद्भवः। ईषत्करः। सुकरः। दुःकरः। दुर्योधनः। युध सम्प्रहारे। तव्यानीयौ॥ राम
धातोस्तव्यानीयौ प्रत्ययौ भवतः। भावादौ। भवितव्यम्। अशनीयम्। करणीयम्। कर्तव्यम्। इटो
ग्रहाम्। ग्रहादीनां इट ईकारादेशो भवति। ग्रह उपादाने। तव्यः। कृतः इट्। तस्य च दीर्घ ईकारः। ८९

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

ग्रहीतव्यम्। वृञ् संभक्तौ। वरीतव्यम्। वरणीयम्। स्वराद्यः। स्वरान्ताद्धातोर्यः प्रत्ययो भवति भावादौ।।
चिञ् चयने। चेयम्। णीञ्। नेयम्। क्षय्यजय्यौ च शक्यार्थे। एतौ शक्यार्थे निपात्येते। क्षेतुं जेतुं वा शक्यं
क्षय्यम्। जय्यम्। अन्यत्र क्षयणीयोयः। क्षेतव्यः। क्षेयः। जयनीयोयः। जेयः। जेतव्यः। चकारात्॥
न जीर्यति अजर्यं साधुसङ्गतम्। माघतेनेनेति मघम्। पुशकालम्। पवर्गान्ताद्धातोः शकादेश्च यः प्रत्य-
यो भवति। जप्यम्। लभ्यम्। शक्यम्। सह्यम्। ईचातः। आकारान्तात् यः प्रत्ययो भवति। आकारस्य च ईका-
रः। देयम्। धेयम्। गेयम्। पेयम्। ऋहसान्ताद्घ्यण्। ऋवर्णान्तात् हसान्ताच्च धातोः घ्यण् प्रत्ययो भवति।
कार्यम्। धार्यम्। वाध्यम्। वाच्यम्। हस हसने। हास्यम्। घित्वात्केकारोपि। वाक्यम्। पाक्यम्। एते ये भा

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi.

वकार्ययोर्विहितास्तव्यादयः तेऽर्हे विधौ च वक्तव्याः॥ दृशोऽर्हसे दृशाम्। दर्शनार्हो द्रष्टव्यः। दर्शनीयः।
दृश्यः। स्वाध्यायोऽध्येतव्यः। श्रु श्रवणे। श्रोतव्यः। ध्यै चिन्तायाम्। ध्यातव्यः। मन्तव्यः। मन ज्ञाने। सप्रत्य
सा॰ यान्तादपि। नितरां ध्यातुमेष्टव्यो निदिध्यासितव्यः। विजिज्ञासितव्यः॥ ओरवश्यमि॥ उवर्णान्तादवश्य
८० केऽर्थे घ्यण् प्रत्ययो भवति। ओदौतोर्यः स्वरवत्। ओकारौकारयोर्यः प्रत्ययः स स्वरवद्भवति। अवश्य
लाव्यम्। अवश्यपाव्यम्। समासे अवश्यमादीनां मलोपमिच्छन्ति। लुम्पेदवश्यमः कृत्ये तुं काममनसो
रपि। समो वा हितततयोर्मांसस्य पचि युड्घञोः। सन्ततम् समततम्। मांसस्य पचनं। मांस्पचनम्। मां राम
सस्य पाकः। मांस्पाकः। ऋदुपधात्क्यप्। ऋदुपधाद्धातोः क्यप् प्रत्ययो भवति। भावकार्ययोः। वृत्यम्। ८०

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

ह्रस्वात् क्यपि पित्वात् तुक् । स्तुत्यः । हृत्यः । स्त्रियां [illegible]यजोर्भावे । यजादेर्धातोः स्त्रियां भावे क्यप् प्रत्य-
यो भवति । किंत्वात् सम्प्रसारणम् । इज्या । व्रज्या । अज गतौ । समजन्त्यस्यामिति समज्या । ब्रह्महत्या ।
लोपस्त्वनुदात्ततनामिति नकारलोपः ॥ क्तिः स्त्रियाम् । क्तिप्रत्ययो भवति स्त्रियां भावे । अनुभूतिः ।
पचि विस्तारे । इदित्वान्नुम् । पंक्तिः । भक्तिः । संवित्तिः । शान्तिः । ग्लानिः । क्नौने द्युतः । सा कृतिः । के
र्तिरिक्तिः । प्रकृ कुत्सने इति प्रकृतिः । इक्श्तिपौ धातुनिर्देशे । पचिः । पठतिः । षिद्भिदादिभ्योऽङ् । षितो धातो-
र्भिदादेश्चाङ् प्रत्ययो भवति । पचा । मृजूष शुद्धौ । मृजा । भिदा । छिदा । जरेत्यत्र षकारानुबन्धरहितो अ
प्रत्ययो भवति । जरा । लेखा । शोभा । गुरोर्हलः । ईह चेष्टायाम् । ईहा । ईक्ष दर्शनाङ्कनयोः । ईक्षा ।

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सा·
८९

कृहा। प्रत्ययान्तात् प्रत्ययान्ता धातोरप्रत्ययो भवति। चिकीर्षा॥ धातोः पूर्वकाले क्त्वा॥ पूर्वकाले क्त्वाप्रत्ययो
भवति समानकर्तृके धातौ प्रयुज्यमाने। स्नात्वा भुंक्ते। भुक्त्वा व्रजति। क्त्वा सेट् किद्वा। वर्तित्वा। वृतित्वा। विदि
त्वा। वेदित्वा॥ अलंखल्वोः प्रतिषेधे क्त्वा। अलं भुक्त्वा। खलु क्त्वा॥ उदितः क्त्वो वेट्। उत् इत् यस्य स उदि
त् तस्मात् परस्य क्त्वाप्रत्ययस्य वा इट् भवति। इष्ट्वा। एषित्वा॥ समासे क्यप्। समासे सति पूर्वकाले क्यप् प्रत्ययो
भवति तत्कर्तृके समानकर्तृके धातौ प्रयुज्यमाने। संभूय करोति। प्रणम्य गच्छति॥ अनेनपूर्व इत्येके। अ
कृत्वा॥ क्यपि भेर्गुणः। क्यपि परे भि प्रत्ययस्य गुणो भवति। क्वचित् स्वरेव घकारः। परिणम्य भुंक्ते। तत्क्त्वे राम
पि ह्रस्वे। नेत्रे संमील्य हसति। मील्यमीलने। मुखं व्यादाय स्वपिति॥ पौनःपुन्ये नमुद्द्विरुक्तं। समानकर्तृकेषु धा ९२०
तुषु प्रयुज्यमानेषु पौनःपुन्येऽर्थे धातोर्णमुल् प्रत्ययो भवति। तस्य पदस्य द्विर्वचनम्। पायं पायं गायति। भोजं भोजं व्र

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

सा. ८२

ति। कथमादिषु स्वार्थे तामकृत्या। कथमादिषु प्रयुज्यमानेषु स्वार्थे कथमादीनामर्थे करोते र्ङुतोर्थमुप्रत्ययो भवति॥
कथंकारम्। इत्थंकारम्। कथमित्थमित्येवं। भुवो भावे क्यप्। भूधातोर्भावे क्यप्प्रत्ययो भवति। ब्रह्मणो भावः। ब्रह्मभूयम्।
कित्वान्नगुणः। लक्षेरीमुट्। लक्ष दर्शनांकनयोः। लक्ष्यते लक्षयतीति वा। लक्ष्मीः। स्त्यापयतेः स्त्रीत्वे ड्रट्। स्तै स्त्ये
शब्दसंघातयोः। टिलोपः। संयोगान्तस्य लोपः। टित्वादीप्। स्त्री। वर्णात्कारः। ककारः। रादिफो वा। र इति वर्णादिफप्र
त्ययो भवति। पक्षे कारः। रकारादीनि नामानि। लोकाच्छेषस्य सिद्धिर्यथा मातरपितरादेः। स्वभूपान्तोनुभूत्यादिः शा
ब्दोभूयत्र सार्थकः। समस्कारी शुभांच के प्रक्रियां चतुरोचिताम्। श्रवनाक्षो हयग्रीवः कमलाकर ईश्वरः। सुरासुर
नराकारमधुपापीतपङ्कजः॥ ॥ इति सारस्वती प्रक्रिया सम्पूर्णा ॥ ॥ शुभं भूयाच्छंकरप्रसादात्। सं। १७८४ राम
वैशाखे वै तृतीयायां लिखितं शुक्रवासरे ॥ पाठायवात्मने दिव्यं दलमतिना पुस्तकम्। सं। १७८४ ॥~ ८२

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi.

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

॥श्री॥ श्री॥
॥१॥

श्रीगणेशायनमः श्रीगुरवेनमः॥ नत्वा [illegible] ईवीसु [illegible] नम॥प [illegible]
णीयपूर्वेणायलघुसिधान्तकौमुदीम॥ [illegible]
यवरटलण· ञमङ·णनम· झभञ· घढ [illegible]
व·कपय·सषसर हल·॥ इतिमाहेश्वरा [illegible]
हीष्वकार उच्चारणार्थी॥ हलन्त्यम॥ उपदेशे [illegible]
च्चारणानि॥ सूत्रेष्वदृष्टं पदं सू-त्रान्तरापदानो [illegible]
पः॥ प्रसक्तस्यादर्शनं लोपस्संज्ञं स्यात॥ तस्यलो [illegible]
ऽनाद्यर्थी॥ आदिरंत्येनसहेता॥ अन्त्येनेत्तासहित [illegible]
त॥ ऊकालोझ्रस्वदीर्घप्लुतः॥ उस्व ऊस्व ऊस्वव: [illegible]

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

श्रीः
॥श्रीः
॥१॥

श्रीगणेशायनमः श्रीगुरवेनमः॥नत्वासरस्वतींदेवींशुद्धांगुण्यांकरोम्यहम्॥पाणि
नीयप्रवेशायलघुसिधांतकौमुदीम्॥१॥अइउण्·ऋलृक्·एओङ्·ऐऔच्·ह
यवरट्·लण्·ञमङणनम्·झभञ्·घढधष्·जबगडदश्·खफछठथ·चटत
व·कपय·शषसर्·हल्·॥इतिमाहेश्वराणिसूत्राण्यणादिसंज्ञार्थानि॥हकारा
दिष्वकारउच्चारणार्थः॥हलन्त्यम्॥उपदेशेऽन्त्यंहलित्स्यात्॥उपदेशआद्यो
च्चारणम्॥सूत्रेष्वदृष्टंपदंसूत्रान्तरादनुवर्तनीयंसर्वत्र॥अदर्शनंलो
पः॥प्रसक्तस्यादर्शनंलोपसंज्ञंस्यात्॥तस्यलोपः॥तस्येतोलोपःस्यात्॥णादयो
ऽणाद्यर्थाः॥आदिरन्त्येनसहेता॥अन्त्येनेतासहितआदिर्मध्यगानांस्वस्यचसंज्ञास्या
त्॥ऊकालोऽज्झ्रस्वदीर्घप्लुतः॥उश्चऊश्चऊ३श्चवः॥वांकालइवकालोयस्यसोऽच्क्र

॥१॥

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

उपूपध्मानीयानामोष्ठौ॥ञमङणनानां नासिका च॥एदैतोः कण्ठतालु॥ओदौतोः
कण्ठोष्ठम्॥वकारस्य दन्तोष्ठम्॥जिह्वामूलीयस्य जिह्वामूलम्॥नासिकानु
स्वारस्य॥इति स्थानानि॥प्रयत्नो द्विधा॥आभ्यन्तरो बाह्यश्च॥आद्यः पञ्चधा॥स्पृ
ष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात्॥तत्र स्पृष्टं प्रयत्नं स्पर्शानां॥ईषत्स्पृष्टमन्तः
स्थानां॥ईषद्विवृतमूष्मणां॥विवृतं स्वराणाम्॥ह्रस्वस्यावर्णस्य प्रयोगे संवृतं॥
प्रक्रियादशायां तु विवृतमेव॥बाह्यप्रयत्नस्त्वेकादशधा॥विवारः संवारः श्वा
सो नादो घोषोऽघोषोऽल्पप्राणो महाप्राणो उदात्तोऽनुदात्तः स्वरितश्चेति॥
खरो विवाराः श्वासा अघोषाश्च॥हशः संवारा नादा घोषाश्च॥वर्गाणां प्रथमतृ
तीयपञ्चमा॥यणश्चाल्पप्राणाः॥अन्ये महाप्राणाः॥कादयो मावसानाः स्पर्शाः

CC-0. Digitized by eGangotri. Kamalakar Mishra Collection, Varanasi

माऽह्रस्वदीर्घप्लुतसंज्ञंस्यात्॥ सप्रत्येकमुदात्तादिभेदेनत्रिधा॥ उच्चैरुदात्तः॥ नीचै
रनुदात्तः॥ समाहारस्वरितः॥ उदात्तत्वानुदात्तत्वेनवर्णधर्मौसमाह्रियतेयस्मिन्
सोचस्वरितसंज्ञंस्यात्॥ सनवविधोपिप्रत्येकमनुनासिकाननुनासिकत्वाभ्यां
द्विधा॥ मुखनासिकावचनोऽनुनासिकः॥ मुखसहितनासिकयोच्चार्यमाणोऽ
नुनासिकसंज्ञंस्यात्॥ तदित्थंअइउऋएषांवर्णानांप्रत्येकमष्टादशभेदाः॥ ऌ
वर्णस्यद्वादशतस्यदीर्घाभावात्॥ एचामपिद्वादशतेषांह्रस्वाभावात्॥ तुल्या
स्यप्रयत्नंसवर्णम्॥ ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयंयस्ययेनतुल्यं
तन्मिथः सवर्णसंज्ञंस्यात्॥ ऋऌवर्णयोर्मिथःसावर्ण्यंवाच्यम्॥ अकुहविस
